# मम पुस्तकम्

नाम – ____________________

पत्रसङ्केतः – ____________________

____________________

चल-दूरवाणी-सङ्ख्या – ____________________

## वार्तालापाय

१. चित्रे प्रदर्शितस्य स्थानस्य स्वच्छतासन्दर्भे भवान् / भवती किं कथयिष्यति ?
२. भवतः / भवत्याः परिवेशे जनाः स्वच्छतायाः पालनं कथं कुर्वन्ति ?
३. स्वच्छतायाः पालनं किमर्थम् आवश्यकम् ?
४. उद्घटितानां वस्तूनां सेवनेन का हानिः भवति ?
५. भोजनात् पूर्वं हस्तयोः प्रक्षालनं किमर्थम् आवश्यकम् ?




चरणदास-मालाकारः
पङ्कजस्य चायापणः
हस्तयोः
प्रक्षालनम् अनिवा

# ५

# आहारः स्वास्थ्यं च

## वयं ज्ञास्यामः

| उ | ऊ | ह | छ | थ | फ | ठ | ङ |
|---|---|---|---|---|---|---|---|

- समयस्य दर्शनम् (होरा, निमेषाः, क्षणानि)।
- समयस्य एककानां परस्परं परिवर्तनम्।
- अङ्कीय-सङ्ख्यानां सञ्ज्ञानं लेखनं च।

■ **चित्रं दृष्ट्वा पठामः -**



मशकः



फलानि



स्वच्छ-हस्तौ



अवकरः

## अक्षराणि पठन्तु लिखन्तु च -

उ



ऊ



उपचारिका उपचारं करोति।

ऊर्णा-द्वारा उष्णवस्त्राणां निर्माणं भवति।

उ ऊ

| | | | |
|---|---|---|---|
| उन्नतः | उत्साहः | ऊर्जा | ऊर्ध्वम् |
| ............................... | ............................... | ............................... | ............................... |

ह



छ



होलिका-पर्व वर्णमयं भवति।

वयं छुरिकया/शाकानि कर्तयामः।

ह छ

| | | | |
|---|---|---|---|
| हलम् | हरितम् | स्वच्छता | छाया |
| .................................. | .................................. | .................................. | .................................. |

थ  फ 

अश्वः रथं वहति । फलप्रिया शीतकं स्रावयति ।

थ फ

| | | | |
|---|---|---|---|
| तीर्थम् | कथा | फलम् | फेनकम् |
| .................................. | .................................. | .................................. | .................................. |

ठ



ङ



काष्ठकुट्टः चञ्च्वा प्रहारं करोति ।

बालः पर्यङ्के शयनं करोति

ठ 3

| अङ्गुष्ठः | कण्ठः | कङ्कणम् | कङ्कतम् |
|---|---|---|---|
| .............................. | .............................. | .............................. | .............................. |

■ **अधः एकस्यां तालिकायां कानिचन पदानि प्रदत्तानि सन्ति । प्रत्येकं पदे प्रयुक्तानि अक्षराणि दृष्ट्वा क्रमशः रिक्तस्थानेषु निर्देशानुसारं पदानि लिखन्तु ।**

छत्रम्, फलम्, गृहम्, कण्ठः, स्थालिका, ज्येष्ठः, ऊर्णम्, उल्लासः, उपचारः
आकाङ्क्षा, अङ्कुरः, अङ्काः, ऊनविंशतिः, उर्वरा, स्थितिः

| उ | ऊ | ह | छ | थ | फ | ठ | ङ |
|---|---|---|---|---|---|---|---|
| उल्लासः | ऊर्णम् | .......... | .......... | .......... | .......... | .......... | .......... |

# संयुक्ताक्षराणि

■ केचन वर्णाः तादृशाः भवन्ति, येभ्यः अ/आ/इ/ई (ा / ा /ि/ ी) इत्यादी-नां स्वरवर्णानां निष्कासनेन ते स्वररहिताः भवन्ति। यथा-

| | | | | | |
|---|---|---|---|---|---|
| च् + अ | च | - | च्यवनः | सच्चरित्रवान् | उच्चारणम् |
| न् + अ | न | - | अन्नम् | अन्यत्र | अनन्यः |
| प् + अ | प | - | स्थाप्यम् | पिप्पलः | विप्लवः |
| म् + अ | म | - | सम्पादनम् | परम्परा | भूकम्पः |
| ल् + अ | ल | - | मूल्यम् | कारवेल्लम् | उल्लासः |

■ हलन्तशब्दानां निर्देशनार्थं (्) इति चिह्नस्य उपयोगः क्रियते यथा –

| | | | | | |
|---|---|---|---|---|---|
| स् + अ | स | - | विद्वस् | अदस् | वेधस् |
| द् + अ | द | - | युष्मद् | अस्मद् | भवद् |
| क् + अ | क | - | प्राक् | त्वक् | तादृक् |

■ (र) रेफस्य विभिन्नानि रूपाणि एवं भवन्ति –

**यथा –**

| | | | | | | |
|---|---|---|---|---|---|---|
| र् म (म् अ) | = | र्म | - | कर्म | धर्मः | हर्षः |
| ट् र् अ | = | ट्र/ढ्र | - | राष्ट्रम् | उष्ट्रः | मेढ्रः |
| क् र् अ | = | क्र | - | क्रोधः | क्रन्दनम् | क्रूरः |

**शिक्षक-निर्देशः-** शिक्षकः / शिक्षिका व्यञ्जनानां विषये प्रतिभागिनः बोधयेत्। अर्ध-अक्षरस्य लेखनस्य कः अभिप्रायः इति अस्मिन् विषये चर्चां कुर्यात्। रेफस्य प्रकारत्रयस्य अपि उच्चारणस्य लेखनस्य च भेदान् स्पष्टं कारयेत्।

## मम शब्दाः

**शिक्षक-निर्देशः-** शिक्षकः / शिक्षिका 'आहारः स्वास्थ्यं च' इत्यस्मिन् विषये चर्चां कुर्यात्। अस्मिन् विषये पाठकान् पृष्ट्वा लिखेत्। एते शब्दाः तेषां स्वमातृभाषायाम् अपि भवितुम् अर्हन्ति।

## आगच्छन्तु, वयं मिलित्वा समयम् अधिगच्छामः –

सामान्यरूपेण घटिकायां द्वादशपर्यन्तम् (१२) अङ्काः भवन्ति । प्रतिद्वयम् अङ्कयोः मध्ये चतस्रः लघ्व्यः रेखाः भवन्ति ।




सम्पूर्णघटिकायां कति रेखाः भवन्ति ? गणयित्वा लिखन्तु ______ रेखाः ।

घटिकायां द्विविधाः त्रिविधाः च सूचिकाः भ्रमन्ति ।




त्रि-सूचिकात्मिका घटिका




द्वि-सूचिकात्मिका घटिका

- होरायाः सूचिका स्थूलतमा लघुतमा च अस्ति । होरायाः सूचिका एक-अङ्कात् द्वितीयम् अङ्कम् एकस्यां होरायां प्राप्नोति । एषा सूचिका द्वादश-होरासु घटिकावृत्तस्य एकं सम्पूर्ण-भ्रमणं करोति तर्हि होरायाः सूचिका चतुर्विंशति-होरायाम् अथवा एकस्मिन् दिने घटिकावृत्तस्य भ्रमणं कतिवारं करोति ? ____________________
- तस्याः कृशतरा दीर्घतरा च सूचिका निमेषस्य अस्ति । निमेषस्य सूचिका एक-अङ्कात् द्वितीयम् अङ्कं पञ्चनिमेषेषु प्राप्नोति । एषा सूचिका षष्टि-निमेषेषु सम्पूर्णस्य घटिकावृत्तस्य एकं भ्रमणं करोति ।
- कृशतमा दीर्घतमा च सूचिका क्षणस्य (सेकेण्ड) अस्ति । एषा सूचिका क्षणं सूचयन्ती सर्वाधिका शीघ्रगामिनी अस्ति ।

यदि निमेषस्य सूचिका द्वादश-अङ्के भवति एवं च होरायाः सूचिका यस्मिन् अङ्के तिष्ठति तर्हि तद् एव वादनं भवति । यथा होरायाः सूचिका अङ्कत्रये भवति निमेषस्य च सूचिका द्वादशे अङ्के भवति तर्हि त्रिवादनम् इति समयः भवति ।







द्वि-वादनम्




पञ्च-वादनम्

## कः समयः ? घटिकां पश्यन्तु -




द्वादश-वादनम्




वादनम्




वादनम्




वादनम्

यदा षष्टि-निमेषाणाम् एका होरा भवति तदा तिसृषु होरासु कति निमेषाः भवन्ति ?

३ × ६० अथवा

  ६०
× ३

# अङ्कीयाः घटिकाः

- अङ्कीयासु घटिकासु समयः लिखितः एव भवति। रेल-स्थानकेषु, चलदूरवाणी-इत्यादिषु अङ्कीय-घटिकानां प्रयोगः भवति।
- सूच्यताम्, एतासु घटिकासु कः समयः ?







अङ्कीयसङ्ख्यानाम् आकृतिः एवं भवति – 0 1 2 3 4 5 6 7 8 9

अङ्कीय-सङ्ख्यानाम् उपयोगः वित्तकोषे, रेलस्थानके, विपणौ तथा गणकयन्त्रे क्रियते।

०६:४०

________ वादनम्

०७:४५

________ वादनम्

१२:४५

________ वादनम्

०६:२०

________ वादनम्

## अभ्यास-कार्यम्

### १. अधः प्रदत्तैः अक्षरैः शब्दनिर्माणं कुर्मः -

फ – .....................

उ – .....................

म – .....................

ह - .....................

### २. अधः प्रदत्तैः शब्दैः वाक्यानि रचयामः -

**वादने, उच्चारणं, पर्यङ्के**

१. रामः श्लोकस्य शुद्धम् __________ करोति।

२. बालः __________ शयनं करोति।

३. प्रमोदः १०:०० __________ कार्यालयं गच्छति।

### ३. मञ्जूषायां प्रदत्तेभ्यः शब्देभ्यः उचितं शब्दं चित्वा मेलनं कुर्मः।

**सज्जनः, उष्ट्रः, परम्परा, कर्म, अस्मद्, अन्नम्**

| | | |
|---|---|---|
| राष्ट्रम् | ष्ट्र | ______ |
| उज्जवलः | ज्ज | ______ |
| भूकम्पः | म्प | ______ |

### ४. प्रदत्तैः शब्दैः वाक्यनिर्माणं कुर्मः -

अन्नम् ____________________

मूल्यम् ____________________

### ५. घटीं दृष्ट्वा समयं लिखामः -

| | | | |
|---|---|---|---|
| १. |  | २. |  |
| ......... - वादनम् | | ......... वादनम् | |

### ६. षष्टि-निमेषाणाम् एका होरा भवति । तिसृषु होरासु कति निमेषाः भविष्यन्ति ?

________________________________________

________________________________________

________________________________________

### ७. रिक्तस्थाने शब्दैः समयं लिखामः -

| | | | |
|---|---|---|---|
| क | १०:२६<br>.............. वादनम् | ख | ०७:४५<br>.............. वादनम् |

### ८. रिक्तस्थानं पूरयामः -

१. निमेषस्य सूचिका एक-अङ्कात् द्वितीय-अङ्कं प्रति ______________ निमेषेषु प्राप्नोति ।

२. होरायाः सूचिका चतुर्विंशति-होरायाम् अथवा ______________ घटि-कावृत्तस्य ______________ वारं भ्रमणं करोति ।